

ॐ

# ।। प्रातः स्मरणम् ।।





कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥१॥




समुद्रवसने देवि ! पर्वतस्तनमण्डले ।
विष्णुपत्नि! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥२॥



ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि-राहु-केतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥३॥









सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥४॥







सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।
भूरादि कृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥५॥


पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुर्ज्वलनं च तेजः ।
नभः सशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ।।६।।



प्रातःस्मरणमेतद् यो विदित्वाऽऽदरतः पठेत् ।
स सम्यक् धर्मनिष्ठः स्यात् संस्मृताऽखण्ड भारत ॥



# ।। भारत माता की जय ।।

# ॥ एकात्मता स्तोत्रम् ॥

ॐ सच्चिदानन्दरूपाय नमोऽस्तु परमात्मने।
ज्योतिर्मयस्वरूपाय विश्वमाङ्ङ्ल्यमूर्तये।।१॥



प्रकृतिः पञ्चभूतानि ग्रहा लोकाः स्वरास्तथा ।
दिशः कालश्च सर्वेषां सदा कुर्वन्तु मङ्गलम् ।।२॥



रत्नाकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम्।।३॥



# महेन्द्रो मलयः सह्यो देवतात्मा हिमालयः।
# ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा।।४।।



# गङ्गा सरस्वती सिन्धुर्ब्रह्मपुत्रश्च गण्डकी ।
# कावेरी यमुना रेवा कृष्णा गोदा महानदी ।।५।।



अयोध्या मथुरा माया काशीकाञ्ची अवन्तिका ।
वैशाली द्वारका ध्येया पुरी तक्षशिला गया ।।६।।



प्रयागः पाटलीपुत्रं विजयानगरं महत् ।
इन्द्रप्रस्थं सोमनाथः तथाऽमृतसरः प्रियम् ।।७।।



चतुर्वेदाः पुराणानि सर्वोपनिषदस्तथा ।
रामायणं भारतं च गीता सद्दर्शनानि च ॥८॥



जैनागमास्त्रिपिटकाः गुरुग्रन्थः सतां गिरः ।
एषः ज्ञाननिधिः श्रेष्ठः श्रद्धेयो हृदि सर्वदा ॥९॥



# अरुन्धत्यनसूया च सावित्री जानकी सती ।
# द्रौपदी कणणगी गार्गी मीरा दुर्गावती तथा ॥१०॥



लक्ष्मीरहल्या चन्नम्मा रुद्रमाम्बा सुविक्रमा ।
निवेदिता शारदा च प्रणम्या मातृदेवताः ॥११॥



श्रीरामो भरतः कृष्णो भीष्मो धर्मस्तथार्जुनः ।
मार्कण्डेयो हरिश्चन्द्रः प्रह्लादो नारदो ध्रुवः ॥१२॥



हनुमाञ्ज्ञनको व्यासो वसिष्ठश्च शुको बलिः ।
दधीचिविश्वकर्माणौ पृथुवाल्मीकिभार्गवाः ॥१३॥



भगीरथश्चैकलव्यो मनुर्धन्वन्तरिस्तथा ।
शिविश्च रन्तिदेवश्च पुराणोद्गीतकीर्तय: ॥१४॥



बुद्धा जिनेन्द्रा गोरक्षः पाणिनिश्च पतञ्जलिः ।
शङ्करो मध्वनिम्बार्कौ श्रीरामानुजवल्लभौ ॥१५॥



# झूलेलालोऽथ चैतन्यः तिरुवल्लुवरस्तथा ।
# नायन्मारालवाराश्च कम्बश्च बसवेश्वरः ॥१६॥




देवलो रविदासश्च कबीरो गुरुनानकः ।
नरसिस्तुलसीदासो दशमेशो दृढव्रतः ॥१७॥



श्रीमत् शङ्करदेवश्च बन्धू सायणमाधवौ ।
ज्ञानेश्वरस्तुकारामो रामदासः पुरन्दरः ॥१८॥



बिरसा सहजानन्दो रामानन्दस्तथा महान् ।
वितरन्तु सदैवैते दैवीं सद्‌गुणसम्पदम् ॥१९॥



भरतर्षिः कालिदासः श्रीभोजो जकणस्तथा ।
सूरदासस्त्यागराजो रसखानश्च सत्कविः ॥२०॥



रविवर्मा भातखण्डे भाग्यचन्द्रः स भूपतिः ।
कलावन्तश्च विख्याताः स्मरणीया निरन्तरम् ॥२१॥



अगस्त्यः कम्बुकौण्डिन्यौ राजेन्द्रश्चोलवंशजः ।
अशोकः पुष्यमित्रश्च खारवेलः सुनीतिमान् ॥२२॥



चाणक्यचन्द्रगुप्तौ च विक्रमः शालिवाहनः ।
समुद्रगुप्तः श्रीहर्षः शैलेन्द्रो बप्परावलः ॥२३॥



# लाचिद्भास्करवर्मा च यशोधर्मा च हूणजित् ।
# श्रीकृष्णदेवरायश्च ललितादित्य उद्बलः ॥२४॥



मुसुनूरिनायकौ तौ प्रतापः शिवभूपतिः ।
रणजित् सिंह इत्येते वीरा विख्यातविक्रमाः ॥२५॥



वैज्ञानिकाश्च कपिलः कणादः सुश्रुतस्तथा ।
चरको भास्कराचार्यो वराहमिहिरः सुधीः ॥२६॥



नागार्जुनो भरद्वाजः आर्यभट्टो वसुर्बुधः ।
ध्येयो वेङ्कटरामश्च विज्ञा रामानुजादयः ॥२७॥



# रामकृष्णो दयानन्दो रवीन्द्रो राममोहनः ।
# रामतीर्थोऽरविन्दश्च विवेकानन्द उद्यशाः ॥२८॥



दादाभाई गोपबन्धुः तिलको गान्धिरादृताः ।
रमणो मालवीयश्च श्रीसुब्रह्मण्यभारती ॥२९॥



## सुभाषः प्रणवानन्दः क्रान्तिवीरो विनायकः ।
## ठक्करो भीमरावश्च फुले नारायणो गुरुः ॥३०॥



सङ्घशक्तिप्रणेतारौ केशवो माधवस्तथा ।
स्मरणीयाः सदैवैते नवचैतन्यदायकाः ॥३१॥



अनुक्ता ये भक्ताः प्रभुचरणसंसक्तहृदयाः ,
अनिर्दिष्टा-वीराः अधिसमरमुद्ध्वस्तरिपवः ।
समाजोद्धर्तारः सुहितकरविज्ञाननिपुणाः ,
नमस्तेभ्यो भूयात् सकलसुजनेभ्यः प्रतिदिनम् ॥ ३२॥





इदमेकात्मतास्तोत्रं श्रद्धया यः सदा पठेत् ।
स राष्ट्रधर्मनिष्ठावान् अखण्डं भारतं स्मरेत् ॥३३॥




# ।। भारत माता की जय ।।




# ।। एकात्मता मंत्र ।।

यं वैदिका मन्त्रदृशः पुराणा, इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं, यं ब्रह्मशब्देन विनिर्दिशन्ति ॥१॥








शैवायमीशं शिव इत्यवोचन्, यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथाऽर्हन्निति बौद्धजैनाः, सत्श्री अकालेति च सिक्ख-सन्तः ॥२॥











शास्तेति केचित् प्रकृतिः कुमारः, स्वामीति मातेति पितेति भक्त्या ।
यं प्रार्थयन्ते जगदीशितारं, स एक एव प्रभुरद्वितीयः ॥३॥





